अथ स्वराङ्कुशशिक्षाऽऽरभ्यते ॥

हेरम्बं चण्डिकां नत्वा शम्भुं सूर्य्यं हरिं गुरुम् ॥ सरस्वतीं कविवरान्वक्ष्येऽहं स्वरनिर्णयम् ॥ १ ॥ उदात्तान्निहतः स्वारः स्वरितात्प्रचयो भवेत् ॥ उदात्तात्स्वरितात्पूर्व्वो नान्यमापद्यते स्वरम् ॥ २ ॥ व्यञ्जनेषु यवौ यत्र प्रयुज्येते ततः परम् ॥ अपूर्वौ नीचपूर्वौ वा ज्ञात्यः स्वारः स उच्यते ॥ ३ ॥ एदोतोरुभयोर्य्यत्र नीचोऽकारः परो यदि ॥ एकीभावे भवेत्तत्र स्वरोऽभिनिहितस्तदा ॥ ४ ॥ इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित् ॥ अनुदात्तस्वरे नित्यं विद्यात्तत्प्रश्लेषलक्षणम् ॥ ५ ॥ इकार उच्चः पूर्व्वस्मिन्परस्मिन्नियतः स च ॥ प्रश्लिष्टमाङ्गराचार्य्याः स्वरवर्णविदस्तदा ॥ ६ ॥ कम्पन्ते ते च चत्वारः स्वरितोच्चोदयाः स्वराः ॥ एतत्सम्यक्प्रकारेण ज्ञात्वाऽसौ कम्पविद्भवेत् ॥ ७ ॥ नीचेन स्वरितः स्वारमेकीभावेऽनुगच्छति ॥ नीचं नीचस्वरैश्चोच्च उच्चत्वमभिगच्छति ॥ ८ ॥ उदात्तात्स्वरितात्पश्चात्स्य स्वरितोदात्तवच्छ्रुतिः ॥ प्रकृत्या निहितं चाङ्गराचार्य्याः स्वरवित्तमाः ॥ ९ ॥ उदात्तपूर्व्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत् ॥ एष सर्व्वत्र स्वारस्तैरोव्य-

ञ्जन एव च ॥ १० ॥ अवग्रहात्परं यत्र स्वरितस्याऽनन्तरः ॥ तैरोविरामं तं विद्यादुदात्तो यद्यवग्रहः ॥ ११ ॥ स्वरे चेत्स्वरितं यत्र विद्यात्तत्र सँय्युतम् ॥ एतत्तु पादवृत्तस्य लक्षणं शास्त्रनिश्चितम् ॥ १२ ॥ जात्यस्वारः स जात्येन श्रुत्यग्ने क्षैप्रउच्यते ॥ तेऽवर्द्धनाऽभिनिहितः प्रश्लिष्टो ह्रीन्द्र गिर्वणः ॥ १३ ॥ तैरोविरामो विष्कभिते तैरोव्यञ्जन ऊतये ॥ पादवृत्तस्य विद्यात्तु ताऽग्नेति निदर्शनम् ॥ १४ ॥ जात्योऽभिनिहितः क्षैप्रस्तैरोव्यञ्जन एव च ॥ तिरोविरामः प्रश्लिष्टः पादवृत्तस्तु सप्तमः ॥ १५ ॥ यत्राभिनिहितात्पूर्वो ह्युदात्तो दृश्यते यदि ॥ तत्र स्वारं न कुर्वीत रथानां नेति दर्शनम् ॥ १६ ॥ एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ॥ तस्योदात्ततरोदात्तादर्द्धमात्रार्द्धमेव वा ॥ १७ ॥ स्वरात्परं व्यञ्जनं यत्पञ्चमेनान्वितं यदि ॥ पूर्वस्य स्वरतो नादो न पूर्वं स्वरते स्वरः १८ ॥ यत्र स्वरात्परो नादः पूर्वस्वरितभाक्परः ॥ तत्राक्षेपो न कर्त्तव्यो नादे सङ्घेऽपि तत्परे ॥ १९ ॥ स्वरितस्यानुरूपेण कम्पं कुर्वीत शास्त्रवित् ॥ ह्रस्वे ह्रस्वं विजानीयाद्दीर्घं दीर्घं तथैव च ॥ २० ॥ स्वरितान्नियतं गच्छेत्स्वरितो नियतश्च नौ ॥ द्विमात्रो यत्र दृश्येत ह्रस्वकम्पः स उच्यते ॥

२१ ॥ अनुदात्तं क्रमात्कुर्य्यात्स्वरितं ह्यवलम्बयेत् ॥ पु-
नर्नियतमार्गच्छेद्दीर्घकम्पः स उच्यते ॥ २२ ॥ ज-
यन्तस्वामिना प्रोक्ताः श्लोकानामेकविंशतिः ॥ स्वराङ्कु-
शेति विख्याता बह्वृचां स्वरसिद्धये ॥ २३ ॥ एको-
दात्तं पदं विद्यादेकस्वारमथापरम् ॥ कानि चोदात्त-
दात्तानि कनिष्ठं निहितं स्मृतम् ॥ २४ ॥ उदात्ता-
न्निहितः स्वार्य्यः स्वारोदात्तौ न चेत्परौ ॥ स्वरितो
यस्तथा भूतो ज्ञेयः सप्राक्षतीस्त्विति ॥ इति श्री
जयन्तस्वामिप्रोक्ता स्वराङ्कुशा शिक्षा समाप्ता (१)

(१) केचन रावणकृता स्वराङ्कुशा शिक्षा प्रतिपाद्यन्ते ॥